संस्कृतवार्ता:

दिनाङ्क: 02.06.2026

प्रात: - 06:55

अथ वार्ताः

प्रधानमन्त्री म्यांमा राष्ट्रपतिः

प्रधानमन्त्री नरेन्द्र मोदी म्यांमा-देशस्य राष्ट्रपतिः यू मिन् आङ्ग् ह्लाईङ्ग इत्येष: च ह्य: नव-दिल्ल्यां द्विपक्षीयोपवेशनं कृतवन्तौ। उभयोः मध्ये ऐतिहासिक-सभ्यतागत- सम्बन्धान् इतोपि सुदढीकर्तुं वार्ता अभवत् । संवादे म्यांमा-भारतदेशयोः मिथः सुरक्षां सम्पर्कं च समेत्य देशद्वयोः सन्बन्धानां समेपि पक्षाः चर्चिताः। उपवेशनस्य अनन्तरं विदेशसचिव: विक्रम मिसरी अवोचत् यत् देश द्वयेन विदेश-व्यवहार-विकास-शिक्षा, स्वास्थ्यादि विषयेषु कार्याचरणाय साहमत्यं प्रकटितम्।

राष्ट्रपतिः- म्यान्मार

राष्ट्रपतिः द्रौपदी मुर्मुः अवदत् यत्, भारतस्य नेबर्हुड्-फ़र्स्ट्, ऐक्ट्-ईस्ट, महासागरादि नीतिषु म्यान्मार-देशः महत्त्वपूर्णः सहभागी अस्ति। ह्यः राष्ट्रपतिभवने म्यान्मार-देशस्य राष्ट्रपत्युः यू मिन् आङ्ग् ह्लाईङ्ग-वर्यस्य स्वागतं कुर्वन्ती राष्ट्रपतिः मुर्मुः अवदत् यत्, उभयोः देशयोः मध्ये पुरातनाः सम्बन्धाः सन्ति। राष्ट्रपतिः अवदत् यत्, म्यान्मार-देशः भारतस्य दक्षिणपूर्व-एशिया-देशस्य प्रवेशद्वारः अस्ति, अपि च एकमात्रः आसियान्-देशः अस्ति यस्य भूसीमा भारतेन सह संलग्ना अस्ति।

भारत - ओमान

भारत-ओमान-व्यापकार्थिक-सहभागितासन्धिः सी.ई.पी.ए. इति ह्य: क्रियान्वितः अभवत् । वाणिज्योद्योग-मन्त्री पीयूष-गोयलः अवोचत् यत् अयं सन्धिः देशद्वयो: आर्थिक-रणनीतिक-सम्बन्धान् द्रढयिष्यति। वार्ताहरान् सम्बोधयन् श्री-गोयलः अवोचत् यत् अयं सन्धिः नूतनापणम् उद्घाटयिष्यति। अनेन निर्याते वृद्धिः भविष्यति निवेशः अपि वृद्धिं यास्यति। व्यापकार्थिक-सहभागिता-सन्धेः अन्तर्गतं भारतीय-निर्यातकेभ्यः ओमाने उत्पाद-समूहेषु विपणौ प्रतिशत-अष्टनवतिमिता शुल्क-मुक्तकार्यानुमतिः भविष्यति। श्रीगोयलेन उक्तं यत् अनेन आजीविकासंवर्धनाय विद्यार्थिभ्यः श्रमिकेभ्यः महिलाभ्यः कृषकेभ्यः मत्स्यजीविभ्यः सूक्ष्मलघुमध्यमोद्यमेभ्यः च महत्त्वपूर्ण-रूपेण लाभो भविष्यति।

भारत-ऑस्ट्रेलिया उपवेशनम्

भारत-ऑस्ट्रेलिया- देशयो: रक्षामंत्रिणो: द्वितीय-संवादोपवेशनं ह्य: नवदिल्ल्याम् अभवत्। रक्षामंत्री राजनाथसिंह: अथ च ऑस्ट्रेलियादेशस्य उपप्रधानमन्त्री रक्षामंत्रिश्च रिचर्ड-मार्ल्स: उपवेशनस्य अध्यक्षतां कृतवन्तौ। श्रीसिंहेन प्रोक्तम् यत् उपवेशनावधौ भारत-ऑस्ट्रेलिया-देशयोर्मध्ये सुरक्षा-संबंध: सुदृढ: अभवत्। श्रीमार्ल्स अवादीत् यत् ऑस्ट्रेलिया भारत देशौ रक्षा-सहभागितां सुदृढ: अकुरुताम्। देश द्वयं सामुद्रिक-क्षेत्रे मिलित्वा कार्यं करिष्यत:। वार्तायां द्विपक्षीय-रक्षा-सहयोग-विषये प्रगति: समीक्षिता। यया सहभागिताया: नूतन-मार्गस्य अन्वेषणं भविष्यति।

भाजपा-उपवेशनम्

भाजपेति दलस्य राष्ट्रियाध्यक्षः नितिन नबीनः ह्यः नवदिल्ल्यां दलस्य वरिष्ठैः पदाधिकारिभिः कार्यकर्तृभिः च सह उपवेशनं कृतवान्। प्रसारमाध्यमैः सह वार्तालापं कुर्वन् दलस्य सांसदः प्रवक्ता च डा. सम्बित पात्रा वर्यः नरेन्द्रमोदी-प्रशासनस्य द्वादश वर्षाणां सेवायाः विषये, सङ्गठनात्मक-विस्तारस्य विषये, तथा च समाजस्य विभिन्नेषु वर्गेषु दलस्य प्रसारस्य विस्तारस्य लक्ष्ययुतान् भावी-उपक्रमान् प्रकाशयन् प्रमुखानि विवरणानि विनिमयी कृतवान्। सः अवदत् यत् प्रशासनं द्वादश वर्षाणि पूरयति, तथा च प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे भारतं कथं प्रगतिम् अवाप्नोत् इति सर्वैरपि दृष्टवन्तः।

॥इति वार्ता:॥